Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १२ अङ्क : १४४
मई - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹ 10

## चिन्तनम्

### परिवर्तमाने खलु संसारे

'संसार' शब्दः एकं प्रसिद्धं विशेषणं धारयति, तदस्ति 'असार' इति। संसारः असारः अस्ति इति वयं लोके असकृत् शृणुमः। परन्तु तस्य स्वभावः भिन्नः अस्ति। सः तु सततं सरति। एवं संसारः सारहीनः नास्ति, अपि तु परिवर्तनशीलः अस्ति। सः महानदी इव नितरां वहति। अतः वयं संसारम् असारं घोषयामः चेत् नदी अपि असारा भवति। नद्याः सौन्दर्यं वहने वर्तते। वहनम् एव तस्याः अस्तित्वस्य आधारः अस्ति। तथैव पवनः वहति। समयः वहति। ऋतवः वहन्ति। वयः वहति। वयम् अपि वहामः। सकलस्य संसारस्य सौन्दर्यं वहने निहितम् अस्ति। एतत्सर्वम् अनुभवन् भर्तृहरिः लिखति –

**भोगा न भुक्ता वयमेव भुक्ताः**
**तपो न तप्तं वयमेव तप्ताः।**
**कालो न यातो वयमेव याताः**
**तृष्णा न जीर्णा वयमेव जीर्णाः।**


आध्यात्मिकं ज्ञानम् अपि, सांसारिकं ज्ञानम् अपेक्षते। मनुष्यः संसारम् अज्ञात्वा परं ज्ञानं प्राप्तुं न शक्नोति। यतो हि संसारस्य वैचित्र्यम् अद्भुतम् अस्ति। तस्य रूपं प्रतिक्षणं परिवर्तते। तस्मात् कारणात् 'कोऽयं संसारः ?' इति स्फुटम् अवगन्तुं न शक्यते। संसारे क्षणमात्रेण सर्वं परिवर्तते। पुरातनं नश्यति, नूतनं च प्रादुर्भवति। अवशीर्णे पुष्पे अङ्कुरः प्रजायते। दिवङ्गते वृद्धे सद्योजातस्य शिशोः कलकलः श्रूयते अनन्तपारस्य संसारसागरस्य तटं न ज्ञायते। तस्य न उत्पत्तिः ज्ञायते, न च अन्तः। केवलं सर्वम् अनुवर्तते। वयं तस्य विराटे प्रवाहे कुतूहलेन वहामः। इत्थङ्गते जीवनं कथम् अवसितम् इति ज्ञानं खलु तत्त्वज्ञानस्य शाखासु सदा लम्बितं भवति। स्तनस्पन्दनमात्रेण युवकानां हृदयं विदारयन्ती अद्यतनी युवती कङ्कालशेषा वृद्धा भूत्वा श्वः भस्मीभविष्यति इति कल्पना अपि मानसं ज्वरं जनयति। यत् गतं तत् न पुनः आयाति। जीवनस्य अन्ते एषः उद्गारः प्रायः श्रूयते – 'जीवनं व्यर्थं गतम्।' अत्र पश्चात्तापेन किं प्रयोजनम् ? मरणस्य सज्जता जीवनस्य प्रारम्भे एव शोभते। अस्माकं समाजे अन्तिमे वयसि भगवद्गीतायाः पाठः क्रियते। सर्वतः पराभूतः वृद्धः भगवद्गीतायाः जीर्णानि पर्णानि परिवर्तयति। यदा नेत्रदीपे स्वल्पं तैलम् अवशिष्यते तदा सः पठति –

**दिनमपि रजनी सायं प्रातः शिशिरवसन्तौ पुनरायातः।**
**कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः॥**

**सतीशः गज्जर्**

# ज्ञानसरिता

## कुतुबमिनार्



कुतुबमिनारभवनं देहल्याः दक्षिणभागे ९-१० मैल्दूरे अस्ति । १२०० तमे वर्षे कुतुबुद्दीनः ऐकः (गुलामवंशीयः) एतस्य भवनस्य निर्माणम् आरब्धवान्। एतस्य औन्नत्यं २३९ पादमितम् अस्ति। पञ्च अट्टाः सन्ति एतस्मिन्। ३७८ सोपानानि सन्ति अत्र।

एतत् भवनं रक्तवर्णीयया सङ्गमरमरशिलया निर्मितम् अस्ति । प्रथमाट्टस्य भित्तौ २० अलङ्कारपङ्क्तयः सन्ति । तासु प्रथमा गोलाकारा, द्वितीया कोणाकारा। एवमेव अन्याः अपि पङ्क्तयः। द्वितीये स्तरे तु सर्वाः अलङ्कारपङ्क्तयः गोलाकाराः एव । तृतीयाट्टे स्थिताः ताः कोणाकाराः । तदुपरि स्थितयोः अट्टयोः भित्तिः तु सामान्या। तन्नाम अलङ्कारपङ्क्तिरहिता। फिरोजशाहः एतत् भवनं निर्मितवान् इति श्रूयते। एतस्य प्रत्यट्टं चन्द्रशाला अस्ति। एतस्य शिखरे किरीटसदृशी काचित् रचना आसीत् इति श्रूयते। किन्तु १८०३ तमे वर्षे जातस्य भूकम्पस्य कारणतः सा अधः अपतत्।

कुतुबमिनारभवनात् अनतिदूरे एव चतुर्थशतकीयः कश्चन लोहस्तम्भः अस्ति । एतस्य परिधिः १६ पादमितः। औन्नत्यं च २३.८ पादमितम्। एतस्य उपरि चन्द्रगुप्तविक्रमादित्यस्य प्रशंसावचनानि उत्कीर्णानि सन्ति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **विलज्जः** | लज्जारहित | shameless |
| **विलपनम्** | विलाप करना | wailing |
| **विलम्भः** | उदारता | liberality |
| **विलापः** | जोर से रोना | to weep loudly |
| **विलिखनम्** | खुरचना | scratching |
| **विलिप्तः** | लीपा हुआ | anointed |
| **विलेपः** | उबटन | ointment |
| **विलोकनम्** | देखना | seeing |
| **विलोचनम्** | नेत्र | the eye |
| **विलोडनम्** | मथना | churning |
| **विलोपः** | लोप | disappearance |
| **विलोभः** | आकर्षण | attraction |
| **विलोमः** | विपरीत | opposite |
| **विलोलः** | चंचल | unsteady |
| **विवक्षा** | कहने की इच्छा | desire to speak |

## किं भवन्तः जानन्ति ?

**१ ) युधिष्ठिरस्य राजसूययज्ञस्य सामवेदोद्गाता कः आसीत् ?**
(क) याज्ञवल्क्यः (ख) सुसामा (ग) धौम्यः (घ) पैलः

**२ ) युधिष्ठिरस्य राजसूययज्ञे अध्वर्युः कः आसीत् ?**
(क) याज्ञवल्क्यः (ख) पैलः (ग) सुसामा (घ) धौम्यः

**३ ) युधिष्ठिरस्य राजसूययज्ञे धौम्यमुनेः किं दायित्वम् आसीत् ?**
(क) होतुः (ख) अध्वर्योः (ग) ब्रह्मणः (घ) सामवेदोद्गातुः

**४ ) एतेषु कः कौरवाणां पाण्डवानां च गुरुः आसीत् ?**
(क) महर्षिव्यासः (ख) द्रोणः (ग) परशुरामः (घ) महर्षिः अग्निवेश्यः

**५ ) वनवासकाले पाण्डवाः कौरवान् कस्मात् गन्धर्वात् अरक्षन् ?**
(क) चित्रसेन (ख) चित्ररथ (ग) विश्वसह (घ) स्थूणाकर्ण

**६ ) खाण्डववनं कौ ज्वालितवन्तौ ?**
(क) भीमार्जुनौ (ख) कृष्णार्जुनौ (ग) भीमनकुलौ (घ) कृष्णबलरामौ

**७ ) भीष्मस्य वधाय का राजकुमारी तपश्चर्याम् अकरोत् ?**
(क) अम्बिका (ख) अम्बालिका (ग) अम्बा (घ) बलन्धरा

उत्तराणि – (१) ख (२) क (३) क (४) ख (५) क (६) ख (७) ग